http://www.rtmnuonline.com

**NRT/KS/19/2005**

**Bachelor of Science (B.Sc.) Semester—I Examination**

**SANSKRIT**

**Paper—2**

**(Other Compulsory Language)**

समय:— होरात्रयम्] [गुणाङ्का:— 60

**सूचना :—** विशेषनिर्देशाभावे उत्तराणि स्वीकृतभाषाया लिखत।

1. कथां लिखत :

शालिवाहनकथा।

**अथवा**

सहाय: क्षेमकारक:। 12

2. प्राणानां सर्वश्रेष्ठत्वं कथं सिद्धमिति स्वशब्दै: स्पष्टयत।

**अथवा**

भोजस्य दानशीलतां वर्णयत। 12

3. (अ) अनुवादं कुरुत :

तदनन्तरमनन्तवर्मा नाम तदायतिरवनिमध्यतिष्ठत्। स सर्वगुणै: समृद्धोऽपि दैवाद्दण्डनीत्यां नात्यादृतोऽभूत्। तमेकदा रहसि वसुरक्षितो नाम मन्त्रिवृद्धः पितुरस्य बहुमत:प्रगल्भवागभाषत। 'तात! सर्वैवात्मसम्पदभिजनात्प्रभृत्यन्यूनैवात्रभवति लक्ष्यते। बुद्धिश्च निसर्गपट्वी, कलासु नृत्यगीतादिषु चित्रेषु च काव्यविस्तरेषु प्राप्तविस्तारा तवेतरेभ्य: प्रतिविशिष्यते। तथाप्यसावप्रतिपद्यात्मसंस्कारमर्थशास्त्रेषु अनग्निसंशोधितेव हेमजातिर्नातिभाति बुद्धि:।'

**अथवा**

बाल: - अनेनैव तावत्क्रीडिष्यामि। (इति तापसीं विलोकय हसति)

राजा - स्पृहयामि खलु दुर्ललिताय अस्मै।

तापसी - भवतु, न माम् अयं गणयति। (पार्श्वमवलोकयति) कोऽत्र ऋषिकुमाराणाम् ? (राजानमवलोक्य) भद्रमुख! एहि तावत् मोचयानेन दुर्मोकहस्तग्रहेण डिम्भलीलया बाध्यमानं बालमृगेन्द्रम्।

राजा - (उपगम्य। सस्मितम्) अयि भो ! महर्षिपुत्र !

तापसी - भद्रमुख, न खल्वयं ऋषिकुमार:।

राजा - आकारसदृशं चेष्टितमेवास्य कथयति।

स्थानप्रत्ययात्तु वयमेवंतर्किण:।

तापसी - (उभौ निर्वर्ण्य) आश्चर्यमाश्चर्यम्। 6

http://www.rtmnuonline.com http://www.rtmnuonline.com

(ब) परिच्छेदं पठित्वा उत्तराणि संस्कृतभाषया लिखत :

सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रज्ञातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् देवपितृकार्याभ्यां न प्रमदितव्यम्।

मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि।

(1) कस्मान्न प्रमदितव्यम् ?

(2) कस्मै प्रियं दातव्यम् ?

(3) काभ्यां न प्रमदितव्यम् ?

(4) के देवतुल्याः जनाः ?

(5) किं सेवितव्यानि ?

(6) केषां सुचरितानि उपासितव्यानि ? 6

4. टिप्पणी**द्वयं** लिखत :

(1) वाल्मीकिः

(2) भासः

(3) माघः

(4) कालिदासः 12

5. (अ) **द्वयोः** ससन्दर्भं स्पष्टीकरण लिखत :

(1) यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि।

(2) सूर्यस्य मण्डळं भित्वा स याति परमां गतिम्।

(3) हे मुने ! ज्ञानविघ्नमहङ्कारः, तं मुक्तवा स्वधर्मं चर।

(4) एतद्विवादस्य निर्णयमहं करिष्ये। 6

(ब) योग्यं विकल्पं चित्वा योजयत :

| (अ) | (ब) |
|---|---|
| भारविः | दण्डनीतिः |
| व्यासः | श्रीपादशिलायां विवेकानन्दः |
| अश्वघोषः | पितृपुत्रमेलनम् |
| दण्डी | महाभारतम् |
| कालिदासः | किरातार्जुनीयम् |
| डॉ. वर्णेकरः | बुद्धचरितम् |

6



http://www.rtmnuonline.com